# Shri Mahakalabhairava Kavacham

# શ્રીમહાકાલભૈરવકવચમ્

## Document Information

Text title : Mahakala Bhairava Kavacham 2

File name : mahAkAlabhairavakavacham2.itx

Category : shiva, kavacha

Location : doc_shiva

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

# શ્રીમહાકાલભૈરવકવચમ્

શ્રીગણેશાય નમઃ ।
શ્રીભૈરવ ઉવાચ ।
અધુના શ્ૃણુ વક્ષ્યામિ કવચં મન્ત્રગર્ભકમ્ ।
મહાકાલસ્ય દેવસ્ય મહાભય નિબર્હણમ્ ॥

ૐ અસ્ય શ્રીમહાકાલભૈરવકવચમન્ત્રસ્ય શ્રીમહાદેવ ઋષિઃ,
જગતી છન્દઃ, શ્રીમહાકાલભૈરવો દેવતા,
હૂં બીજં, હ્રીં શક્તિઃ, પ્રસીદ પ્રસીદ કીલકમ્ ।
સર્વેષ્ટ કામના સિધ્યર્થે, આત્મનઃ ધર્માર્થકામમોક્ષાર્થે
શ્રીમહાકાલભૈરવપ્રીત્યર્થે કવચ પાઠે વિનિયોગઃ ॥

અથ કરન્યાસઃ -
ૐ હ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં મધ્યમાભ્યાં નમઃ ।
ૐ હ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ હ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અથાઙ્ગન્યાસઃ -
ૐ હ્રાં હૃદયાય નમઃ ।
ૐ હ્રીં શિરસે સ્વાહા ।
ૐ હ્રૂં શિખાયૈ વષટ્ ।
ૐ હ્રૈં કવચાય હુમ્ ।
ૐ હ્રૌં નેત્રત્રયાય વૌષટ્ ।
ૐ હ્રઃ અસ્ત્રાય ફટ્ ॥

અથ ધ્યાનમ્ ૧ -

નીલજીમૂતસઙ્કાશં મહાભયત્રિલોચનમ્ ।
નીલકણ્ઠં ખડ્ગચર્મવરાભયધરં ભુજૈઃ ॥

પિનાક શૂલ ખટ્વાઙ્ગતોમરાત્વિભ્રતં વિભુમ્ ।
પ્રાસ પટ્ટિસ હસ્તં વૈ મહાકાલં સ્મરામ્યહમ્ ॥

અથ ધ્યાનમ્ ૨ -
ઉદ્દિજીમૂતસઙ્કાશં મહાકાલં ત્રિલોચનમ્ ।
કપાલખટ્વાઙ્ગધરં વરાભયકરં સદા ॥

શૂલતોમરહસ્તઞ્ચાભયદં સાધકેષ્ટદમ્ ।
પ્રાસ પટ્ટિસ હસ્તં વૈ મહાકાલં સ્મરામ્યહમ્ ॥

કૂર્ચયુગ્મં શિરઃ પાતુ મહાકાલોમમાવતુ ।
મહાકાલપ્રસીદેતિદ્વયં મેવ્યાલ્લલાટકમ્ ॥ ૧॥

માયાદ્વયં ભ્રુવૌપાતુ સદાશિવોમમાવતુ ।
ઠદ્વયમ્મેવતાન્નેત્રે નીલકણ્ઠોવતાત્સદા ॥ ૨॥

સર્વમન્ત્રં શ્રુતીમેવ્યાત્કપર્દી સર્વતોવતુ ।
તારં મે પાતુ ગણ્ડૌ ચ ત્રિલોચનોવતાન્મમ ॥ ૩॥

માયાયુતશ્ચમે નાસાં દેવોવ્યાત્ ત્રિપુરાન્તકઃ ।
લક્ષ્મી મુખન્તથૌષ્ટૌ મે પાયાદન્ધકનાશકૃત્ ॥ ૪॥

વાગ્બીજં મોહનં પાયાદ્ હાટકેશ્વરભૈરવઃ ।
હૃજ્જબીજં કન્ધરન્તુ પાયાત્કાલાન્તકઃ સદા ॥ ૫॥

શક્તિબીજં ગલમ્પાતુ દેવઃ કામાન્તકો મમ ।
મહાકાલભૈરવાયેત્યેતત્સ્કન્દૌ મમાવતુ ॥ ૬॥

પૃષ્ઠસ્થલે સદાવ્યાન્મે ભૂતનાયક ભૈરવઃ ।
શ્મશાનસ્થોઃ પાતુ નખાન્મમાઙ્ગુલિ સમન્વિતામ્ ॥ ૭॥

સ્તનૌ દિગમ્બરઃ પાતુ વક્ષઃ પશુપતિર્મમ ।
કુક્ષિં પાતુ મહાકાલો શૂલી પૃષ્ઠં મમાવતુ ॥ ૮॥

શિશ્નમ્મે શઙ્કરઃ પાતુ ગુહ્યં ગુહ્યેશવલ્લભઃ ।
જ્વલત્પાવકમધ્યસ્થઃ કટિં પાતુ સદા મમ ॥ ૯॥

ઊરૂમેવ્યાદ્ભસ્મશાયી જાગર્થકશ્ચ જાનુનિ ।

જઙ્ઘેમેવ્યાત્કાલરુદ્રો ગુલ્ફૌ જટાધરોવતુ ॥ ૧૦॥

પાદૌમેવ્યાન્મહાતેજઃ શૂલખડ્ગધરોવ્યયઃ ।
પાદાદિ મૂર્ધપર્યન્તં પાતુ કાલાગ્નિભૈરવઃ ॥ ૧૧॥

શિરસઃ પાદપર્યન્તં સદ્યોજાતો મમાવતુ ।
રક્ષાહીનં નામહીનં વપુઃ પાતુ સદાશિવઃ ॥ ૧૨॥

પૂર્વેવલવિકરણો દક્ષિણે કાલશાસનઃ ।
પશ્ચિમે પાર્વતીનાથોશ્ચુત્તરેમાં મનોન્મનઃ ॥ ૧૩॥

ઐશાન્યામીશ્વરઃ પાયાદાગ્નેયામગ્નિલોચનઃ ।
નૈરૃત્યાં શમ્ભુરવ્યાન્માં વાયવ્યાં વાયુવાહનઃ ॥ ૧૪॥

ઊર્ધ્વં બલપ્રમથનઃ પાતાલે પરમેશ્વરઃ ।
દશદિક્ષુ સદા પાતુ મહાકાલોતિભીષણઃ ॥ ૧૫॥

રણે રાજકુલે દ્યૂતે વિષમે પ્રાણસંશયે ।
પાયાત્કાલો મહારુદ્રો દેવદેવો મહેશ્વરઃ ॥ ૧૬॥

પ્રભાતે પાતુમાં બ્રહ્મા મધ્યાહ્ને ભૈરવોવતુ ।
સાયં સર્વેશ્વરઃ પાતુ નિશાયાં નિત્યચેતનઃ ॥ ૧૭॥

અર્ધરાત્રે મહાદેવો નિશાન્તેસુ મહોદયઃ ।
સર્વદા સર્વથા પાતુ મહાકાલઃ મહાપ્રભુઃ ॥ ૧૮॥

ઇતીદં કવચં દિવ્યં ત્રિષુ લોકેષુ દુર્લભમ્ ।
પુણ્યં પુણ્યપ્રદં દિવ્યં મહાકાલાધિદૈવતમ્ ॥ ૧૯॥

સર્વમન્ત્રમયં ગુહ્યં સર્વતન્ત્રેષુ ગોપિતમ્ ।
સર્વસારમયં દેવિ સર્વકામફલપ્રદમ્ ॥ ૨૦॥

ય ઇમં પઠેન્મન્ત્રી કવચં વાચયેત્તથા ।
તસ્ય હસ્તે મહાદેવિ ત્ર્યમ્બકસ્યાષ્ટસિદ્ધયઃ ॥ ૨૧॥

રણે ધૃત્વાચરેદ્યુદ્ધં હત્વાશત્રુઞ્જયં લભેત્ ।
ધનં હૃત્વા જયં દેવિ સપ્રાપ્સ્યતિ સુખી પુનઃ ॥ ૨૨॥

મહાભયે મહારોગે મહામારી ભયે તથા ।
દુર્ભિક્ષે શત્રુ સઙ્ઘાતે પઠેત્કવચમાદરાત્ ॥ ૨૩॥

સર્વં તત્પ્રશમયાતિ મહાકાલપ્રસાદતઃ ।
પુત્રાર્થી લભતે પુત્રાત્વિદ્યા માપ્નોતિ સાધકઃ ॥ ૨૪॥

ધનમ્પુત્રાંસુખંલક્ષ્મીમારોગ્યં સર્વસમ્પદઃ ।
પ્રાપ્નોતિ સાધકઃ સદ્યોદેવિ સત્યં ન સંશયઃ ॥ ૨૫॥

ઇતીદં કવચં દિવ્યં મહાકાલસ્ય સર્વદા ।
ગોપ્યં સિદ્ધિપ્રદં ગુહ્યં ગોપનીય સ્વયોનિવત્ ॥ ૨૬॥

અશાન્તાય ચ ક્રૂરાય શઠાયા દીક્ષિતાય ચ ।
નિઃશ્રદ્ધાયાપિ ધૂર્તાય ન દાતવ્યં કદાચન ॥ ૨૭॥

નદદ્યાત્પરશિષ્યેભ્યોઃ પુત્રેભ્યોઽપિ વિશેષતઃ ।
રહસ્યં મમ સર્વસ્વં ગોપ્યં ગુપ્તતરં કલૌ ॥ ૨૮॥

સ્કન્દસ્યાપિ મયાનોક્તં તવોક્તં ભાવનાવશાત્ ।
દુર્જનાદ્રક્ષણીય ચ પઠનીય મહર્નિશમ્ ॥ ૨૯॥

શ્રોતવ્યં સાધકમુખાદ્રક્ષણીયં સ્વપુત્રવત્ ।
ઇત્યેષ પટલો દિવ્યો વર્ણિતોખિલસિદ્ધિકૃત્ ॥ ૩૦॥

પાલનીયઃ પ્રયત્નેન રક્ષિતવ્યઃ સદાશિવે ।
સંસારાર્ણવ મગ્નાનામુપાયઃ પરમઃ સ્મૃતઃ ॥ ૩૧॥

ભક્તિહીના અપુત્રાય ન દાતવ્યં કદાચન ।

ઇતિ શ્રીવિશ્વનાથસારોદ્ધારેતન્ત્રે ઉત્તરખણ્ડે મન્ત્રપ્રદીપિકાયાં
શ્રીકામેશ્વરરહસ્યે ષડામ્નાયનિર્ણયે શ્રીમહાકાલપઙ્ચાઙ્ગે
શ્રીમહાકાલભૈરવ મન્ત્રગર્ભકવચં સમાપ્તમ્ ॥

Encoded and proofread by Ravin Bhalekar ravibhalekar at hotmail.com

*Shri Mahakalabhairava Kavacham*

pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*